# lakShmIstotram from Venkateshakavyakalapa

# લક્ષ્મીસ્તોત્રમ્ વેઙ્કટેશકાવ્યકલાપાન્તર્ગતમ્

## Document Information

Text title : shrIlakShmIstotram

File name : lakShmIstotraVkalApa.itx

Category : devii, stotra, devI

Location : doc_devii

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha KavyakalApa

Latest update : June 10, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2022

*sanskritdocuments.org*

# લક્ષ્મીસ્તોત્રમ્ વેઙ્કટેશકાવ્યકલાપાન્તર્ગતમ્

શ્રિયં શ્રીવેઙ્કટેશસ્ય શ્રીનિવાસસ્ય વલ્લભામ્ ।
ઈશ્વરીં સર્વભૂતાનામાશ્રયે વિશ્વમાતરમ્ ॥ ૧॥

વિષ્ણોર્વિચિત્રચિદચિન્મિશ્રવિશ્વવિધિશ્રમઃ ।
સફલસ્સકૃદાલોકાદ્યસ્યાસ્તસ્યૈ નમઃ શ્રિયૈ ॥ ૨॥

યસ્યા મુગ્ધકટાક્ષદુગ્ધકણિકા ન્યૂનાધિકોદઞ્ચિતાઃ
દ્વિત્રાઃ કુત્રચિદેકતસ્ત્રિચતુરાઃ કિઞ્ચાન્યતઃ પઞ્ચષાઃ ।
બ્રહ્મેશેન્દ્રમુખામરાન્નરપતીંશ્ચોચ્ચાવચશ્રીજુષઃ
કુર્વન્ત્યાશ્રિતવત્સલાં ભગવતીં તામાશ્રયામઃ શ્રિયમ્ ॥ ૩॥

અસ્તોકસ્તબકા સ્તનદ્વયમિષાત્ પાણિપ્રવાલોજ્જ્વલા
રોમાલીલલિતાલિઅપઙ્ક્તિમહિતા બાહુપ્રતાનાઞ્ચિતા ।
સામોદા હરિકલ્પવૃક્ષવિપુલોપઘ્ના વૃષાદ્રેસ્તટે
લક્ષ્મીકલ્પલતા સ્થિરા મયિ કૃપાવીક્ષાપ્રસૂનં ક્ષિપેત્ ॥ ૪॥

સ્વૈરોદ્વેલકૃપાકટાક્ષસુધયા સમ્પ્લાવયન્ત્યા જગત્
લક્ષ્મ્યાસ્તૌ ચરણૌ પ્રપન્નસુલભૌ સ્તોતું પ્રયસ્યામ્યહમ્ ।
યલ્લાક્ષારસલક્ષ્મ વક્ષસિ હરેર્વીક્ષ્યૈવ સાક્ષાત્પરં
બ્રહ્મેદં જગદેકકારણમિતિ ત્રય્યન્તવર્ગા જગુઃ ॥ ૫॥

વેદાન્તા વિબુધાશ્ચતુર્મુખમુખાસ્સન્તસ્સનન્દાદયઃ
વ્યાસાદ્યા મુનયશ્ચ સૂરિનિવહા લક્ષ્મીપતિર્વા સ્વયમ્ ।
સર્વે યન્મહિમામૃતાબ્ધિકણિકેયત્તાં ન વેત્તું ક્ષમાઃ
તાં લક્ષ્મીમનપત્રપઃ કથયિતું વાઞ્છામિ ધિઙ્માં કવિમ્ ॥ ૬॥

માતઙ્ગસ્સુમહાનણુશ્ચ મશકઃ પાતું પ્રવૃત્તૌ તૃષા
દુગ્ધાબ્ધિં પિબતસ્સ્વશક્ત્યનુગુણં કૃત્સ્નં ન પાતું ક્ષમૌ ।
માતર્લક્ષ્મિ તવ પ્રભાવજલધૌ બ્રહ્માઽપ્યહં ચેદૃશૌ

યજ્ઞાનાદિષુ તારતમ્યમુભયોર્નૌ તેન કિં સાધિતમ્ ॥ ૭॥

મુગ્ધસ્તનન્ધયમુખાત્ પ્રથમોદિતા વાક્
અવ્યક્તવર્ણમધુરા સ્વદતે હિ માત્રે ।
શ્રીરમ્બ તદ્વદતિમૌગ્ધ્યકૃતા સ્તુતિર્મે
ત્વત્કર્ણવર્ત્મનિ વમેદમૃતસ્ય ધારામ્ ॥ ૮॥

સુધાધારાસેકાદિવ સુખિતકર્ણાઃ સુકવયઃ
સ્તુવીરન્ યાઃ શ્રુત્વા સપદિ સશિરઃકમ્પમવશાઃ ।
તથાભૂતા માતરસ્તુતિવચનભઙ્ગીસ્ત્વદુચિતાઃ
વિધાતું મે શક્તિં વિતર વૃષશૈલેશદયિતે ॥ ૯॥

મહિતમહસઃ પઙ્કે મગ્નાન્મણીનિવ ચેતનાન્
પ્રલયતમસા ગાઢં ગૂઢાનસત્સમતાં ગતાન્ ।
ન યદિ ભવતી માતઃ પશ્યેદ્દયાર્દ્રદૃગઞ્ચલા
કથમિવ ભવેત્સત્તા તેષાં પુમર્થકથા કુતઃ ॥ ૧૦॥

અસ્યેશાના જગત ઇતિ યા વિશ્રુતા વિશ્વગોપ્ત્રી
સત્યં સા ત્વં ભવસિ કમલે વિષ્ણુપત્નીત્યનૂક્તેઃ ।
તસ્યા માતસ્તવ પરિજનેષ્વાત્મસુ પ્રેમબન્ધઃ
તદ્વાત્સલ્યં નિરવધિકૃપા સર્વમેતન્ન ચિત્રમ્ ॥ ૧૧॥

શ્રુતિશિરોવરકોશગૃહાહિતાન્ સ્મૃતિપુરાણસુદીપવિદીપિતાન્ ।
સ્ફુરિતતાવકદિવ્યગુણાન્ મણીન્ સ્વહૃદયે સુધિયો દધતીન્દિરે ॥ ૧૨॥

રસ્યં ગવામપિ પયો રસનોપઘાતાત્
પૈત્યેન તિક્તમિતિ વક્તિ યથા તથાઽપિ હિ ।
તત્ત્વં પરં ત્વદુપગૂઢમપોઢહેયં
હેયાસ્પદં વદતિ કશ્ચન ગાઢપાપઃ ॥ ૧૩॥

નિત્યોદઞ્ચિતચઞ્ચરીકનિનદાં નીરન્ધ્રપુષ્પદ્રુમાં
નિર્યન્નિર્ઝરશીતલાં વૃષગિરેરુત્તુઙ્ગશૃઙ્ગસ્થલીમ્ ।
કૃત્વા કેલિગૃહં રમે રમયસે સર્વેશ્વરં ત્વત્પ્રિયં
ભોગોપક્રમવિભ્રમભ્રમિમુખે ભગ્નં મુહુઃ કુર્વતી ॥ ૧૪॥

મધુકરમૌલિદઘ્નમકરન્દરસપ્રસર-
પ્રકલિતભૂલસેકપરિબૃંહિતપુષ્પવને ।

વિરચિતપાદચારમિહ વેઙ્કટશૈલતટે
વિહરસિ દેવિ લક્ષ્મિ કરલમ્બિતકાન્તકરા ॥ ૧૫॥

કમલપલાશદેશ્યપરિપેશલચિહ્નપદ -
દ્વિતયનિવેશનાઙ્કપરિકર્મપવિત્રશિલાઃ ।
તવ ચ તવ પ્રિયસ્ય વિનમન્તિ વૃષાદ્રિતટે
વિકચકુશેશયોદરવિહારિણિ સર્વસુરાઃ ॥ ૧૬॥

ઉપનિષદાં સહસ્રમુપબૃંહણમપ્યખિલં
વદતિ પરોક્ષમમ્બ દયિતેન સમં ભવતીમ્ ।
અથ પુનરઞ્જનાદ્રિરપરોક્ષમવેક્ષયતે
શરણમયાસિષં તમધિકાદ્ભુતભૂમિમહમ્ ॥ ૧૭॥

ત્વયિ વૃષશૈલસીમ્નિ કુસુમાપચયાવસરે
દયિતવિલોભનાય ધૃતદિવ્યલતાવપુષિ ।
પતિરપિ તે પ્રગલ્ભમતિરેત્ય મધુવ્રતતામ્
અતિપતિતાન્યવલ્લિ ભવતીમભિકામયતે ॥ ૧૮॥

સુતનુ લુનાવ પુષ્પમધિકાપચયેઽસ્તુ જયઃ
તવ મમ વેત્યુદીર્ય કુસુમાનિ લુનન્ કમલે ।
ત્વદુદિતનર્મસૂક્તિરસનિઘ્નમનાઃ પ્રહસન્
પ્રસવપરાઙ્મુખશ્ચ વિજિતો વૃષશૈલપતિઃ ॥ ૧૯॥

સહચરવેઙ્કટેશકરનમ્રિતકલ્પતરોઃ
અભિનવપુષ્પજાતમપચેતુમુદગ્રમુખી ।
પ્રિયતમમુગ્ધહાસમુખચન્દ્રવિલોપિતધીઃ
ત્વમપચિનોષિ તસ્ય મણિદામમહઃપ્રસવાન્ ॥ ૨૦॥

જનનિ સખીસમક્ષમુપગૂહનલોલમતેઃ
તવ પતિમિઙ્ગિતજ્ઞમતિપુષ્પિતવૃક્ષતનુમ્ ।
સપુલકકમ્પઘર્મસલિલાદિવિકારભૃતઃ
કુચયુગતો નિપીડ્ય કુસુમાનિ લુનાસિ શનૈઃ ॥ ૨૧॥

અન્તર્વસન્તમવલમ્બિતહેમશ‍ૃઙ્ગાં
આલિપ્તકુઙ્કુમકુચામરુણોત્તરીયામ્ ।
આનીલવેણિમનુરૂપસખીવૃતાં ત્વાં
આલોક્ય વિસ્મયભરસ્તિમિતઃ પતિસ્તે ॥ ૨૨॥

પ્રાપ્તા સ્વામિસરઃ પ્રસન્નસલિલં સ્નાતું સહ પ્રેયસા
દૃષ્ટ્વા સ્વપ્રતિબિમ્બમમ્બ સુભગં સ્તબ્ધા પ્રતિશ્રીધિયા ।
આસ્ફાલ્યા(મ્બુનિ) કમ્પિતેઽત્ર વિમતાદૃષ્ટ્યા પ્રસન્ના પુનઃ
પત્યા નિર્વિશસિ ત્વમઞ્જનગિરૌ કીલાલલીલારસમ્ ॥ ૨૩॥

કાન્તેન શૃઙ્ગસલિલૈસ્સકૃદુક્ષિતાં ત્વાં
વીક્ષ્યાસહિષ્ણુભિરુપેત્ય સખીજનૈસ્તે ।
પર્યુક્ષિતઃ પતિરનારતમમ્બુવૃષ્ટ્યા
નિર્ણિક્તનીલમણિશૈલરુચિં દધાતિ ॥ ૨૪॥

સિઞ્ચન્ત્યાં કરવારિણા પ્રિયમુખં ત્વાય્યેકયા હેલયા
સિઞ્ચન્તીષ્વભિતઃ સખીષ્વપિ નિરુચ્છ્વાસો નિમજ્જ્યાન્યતઃ ।
ઉન્મજ્જ્ય સ્મિતફુલ્લગણ્ડફલકાં ત્વાં પુણ્ડરીકેક્ષણઃ
પશ્યન્ સાઞ્જલિ વારયત્યભિયતીં ભૂયશ્ચ સેકોત્સુકામ્ ॥ ૨૫॥

યસ્તે શ્રીઃ પુષ્પમેકં ચરણકમલયોરર્પયેદ્ભૂતિકામો
વજ્રાલઙ્કારહસ્તસ્સ ખલુ સુરપુરીવીથિકાભ્યન્તરેષુ ।
દિવ્યસ્ત્રીભિસ્સ્વહસ્તૈરચિરમુપચિતૈઃ પારિજાતપ્રસૂનૈઃ
આરાદાકીર્યમાણશ્ચરતિ સુરપતિસ્સ્વૈરમૈરાવતેન ॥ ૨૬॥

સમ્પત્કામસ્સકૃત્ત્વાં પ્રણમતિ કમલે યા (યો) યદૃચ્છાપ્રવૃત્તિઃ
સોયં હંસાધિરૂઢઃ પ્રતિદિશવદનો ભારતીપ્રાણનાથઃ ।
બ્રહ્માણ્ડૈકાધિપત્યસ્મયકૃતવિકૃતિઃ સેવ્યતે (સાવ)રાર્યૈઃ (રોધૈઃ)
દેવૈર્દિક્પાલમુખ્યૈરધિગતવિનયૈરઞ્જલિવ્યગ્રહસ્તૈઃ ॥ ૨૭॥

યો વા કશ્ચિજ્જાતુ કામ્યેષ્વકામો
ભૂયિષ્ઠાં તે નમૌક્તિ વિધ(ત્તે) ।
(દત્ત્વા તસ્મૈ) દેવિ ભોગાપવર્ગૌ
ન ત્વં દૃ(તૃ)પ્તા કીદૃગૌદાર્યમેતત્ ॥ ૨૮॥

કશ્ચિત્ત્વાશ્ચર્યબુદ્ધિઃ કબલયતિ કલા યાશ્ચતુષ્ષષ્ટિસઙ્ખ્યાઃ
કશ્ચિ(ત્ત્વત્યન્તમન્દઃ પિકકરટભિદા)ન્નેવ(ન્નૈવ) શક્તો વિવેક્તુમ્ ।
કોઽપ્યન્યસ્સાર્વભૌમો ભુવમનુભવતિ ક્ષુત્કૃશઃ કોઽપિ ભિક્ષુઃ
વૈષમ્યસ્યાસ્ય હેતુર્ભગવતિ કમલે ત્વ(ત્કટાક્ષાકટાક્ષૌ) ॥ ૨૯॥

કનકલતેવ નીલમણિશૈલવિશાલતટં

કપિશિમદીપ્રકમ્રકલિકેવ તમાલતરુમ્ ।
અભિનવમમ્બુવાહમચલેવ તટિલ્લતિકા
મુરજિદુરઃ પયોધિ(દુહિ)તઃ પરિભાવયસે ॥ ૩૦॥

અમૃતલહરીમાલાલીલાવિજિત્વરવિભ્રમૈઃ
શિશિરમધુરૈઃ શ્રીરમ્બ ત્વત્પ્રતિક્ષણવીક્ષણૈઃ ।
ઉપચિતમહાબાહાશાખશ્શુચિ (સ્મિત) કા(કો)રકઃ
ફલતુ ભજતાં તત્તત્કામાંસ્તવ પ્રિયકલ્પકઃ ॥ ૩૧॥

અયિ વૃષગિરેરુચ્ચૈશૃઙ્ગાગ્રમઙ્ગલદીપિકે
નિજપરિજનસ્ત્રીનેત્રાણાં નિરન્તર ચન્દ્રિકે ।
ભવહુતવહજ્વાલાર્તાનાં સુધામયદીર્ઘિકે
જય જય જગજ્જન્યે ધન્યે જનાર્દનજીવિકે ॥ ૩૨॥

નારીણામુત્તમા ત્વં પતિરપિ પુરુષેષૂત્તમસ્તે વિભૂતિઃ
નિત્યા ભોગાય લીલારસપરિણતયે કલ્પિતૈષા વિભૂતિઃ ।
ભૃત્યા બ્રહ્માદિદેવાસ્સહજપરિજનાસ્સૂરયો નિત્યશુદ્ધાઃ
(હે શ્રી)સ્ત્વદ્ભાગધેયં નિરવધિકમહં ભાવયેયં કથં વા ॥ ૩૩॥

માતર્મહત્ત્મતિવાઙ્મનસંવત્વદીવયં
યસ્યાસ્તવ પ્રણયરોષકષાયિતાયાઃ ।
નીરાજ(ય)મ(ત્ય)રુણમઙ્ઘ્રિયુગં કિરીટ-
રત્નત્વિષા નિખિલલોકપતિર્મુકુન્દઃ ॥ ૩૪॥

નાનાદેવાદિદેહપ્રકૃતિપરિણતૌ કર્મપાશેન બદ્ધાન્
પર્યાયેણોચ્ચનીચભ્રમિતજલઘટી(ધારિ) યન્ત્રસ્ય નીત્યા ।
ઊર્ધ્વાધોલોકગત્યા ગતિજવવિવશાન્ પ્રાણિનસ્ત્રાતુમેતાન્
કો વાઽન્યશ્શક્યશઙ્કઃ પ્રભુરિતિ કમલે ત્વત્સખાદ્વેઙ્કટેશાત્ ॥ ૩૫॥

દુર્લઙ્ઘે દુઃખસિન્ધૌ દુરનુભવમહાવ્યાધિભેદોત્તરઙ્ગે
સમ્ભગ્નાન્વીક્ષ્ય જીવાન્ સહજકરુણયા પ્રેરિતા લોકમાતઃ ।
કૂપાન્તર્મુગ્ધપુત્રં પતિતમનુપતન્માતૃવલ્લોકમેતં
પ્રાપ્તા વૈકુણ્ઠધામ્નસ્ત્વમિહ વૃષગિરૌ વર્તસે ત્રાતુમેતાન્ ॥ ૩૬॥

સ્મિતરુચિકૌમુદીકવદનેન્દુરુદારવપુઃ
ત્વરિતમવાતરદ્ય(રિષ્ય)દમૃતેન ન ચેદ્ભવતી ।
ચલિતચતુર્ભુજસ્ય મથિતોદ્ધૃતદુગ્ધનિધેઃ

ધ્રુવમભવિષ્યદમ્બ કમિતુસ્તવ નીરસતા ॥ ૩૭॥

પ્રવહદમૃતપૂરાત્ પ્રાદુરાસીઃ પયોધેઃ
અમૃતમથનદાન્તં મોહયન્તી મુકુન્દમ્ ।
અથ વિપુલમયાસીદન્તરં તસ્ય બાહ્વોઃ
અનિમિષમમરાણાં પશ્યતાં પદ્મવાસે ॥ ૩૮॥

સાન્દ્રાર્દ્રાગસિ સંહિતાદનુગતાદસ્ત્રાદતિત્રાસિનિ
ભ્રાન્ત્વા સર્વજગત્ સુ(સ્વ)ગોમૃવિરહાત્ કાકે પુરઃ પેતુષિ ।
દૃષ્ટ્વૈનં જનનિ ત્વયા સદયયા વિજ્ઞાપ્ય વીરવ્રતં
પત્યુસ્તે પ્રતિબોધિતા રઘુકુલોત્તંસસ્ય પુંસઃ કૃપા ॥ ૩૯॥

પદ્મે પરિષ્કૃતમતીં પરિફુલ્લદૃષ્ટિં
સીતાં સમીક્ષ્ય જનકાઙ્કનિષેદુષીં ત્વામ્ ।
ત્વદ્ભ્રૂવિભઙ્ગવિધિના વિહિતોપદેશઃ
શમ્ભોર્બભઞ્જ ધનુરાશુ રઘુપ્રવીરઃ ॥ ૪૦॥

રામો રમે તવ કૃતે રઘુવીરજાયે
ભોગીન્દ્રભોગસુભગામુપધાય બાહામ્ ।
આજાનુબાહુરશયિષ્ટ તટે પયોધેઃ
પ્રસ્પર્ધયન્ પ્રતિપયોધિરિવ પ્રસુપ્તઃ ॥ ૪૧॥

શ્રીરમ્બ મૈથિલિ પતિસ્તવ ધર્મપત્ન્યાઃ
પ્રાપ્તેસ્તિરોધિમુદધિં વ્યતિલઙ્ઘ્ય વીરઃ ।
આલૂય સઙ્કુલમરાતિકુલં સમૂલમ્
આસીત્ત્વદીયમુખપદ્મવિકાસભાસ્વાન્ ॥ ૪૨॥

માતર્મનોનયન(રઞ્જ)નદિવ્યરૂપઃ
કૃષ્ણસ્સતૃષ્ણહૃદયસ્ત્વયિ ભાવવત્યામ્ ।
વીરો વહન્નુર્રસિ વૈરિશરાન્મહાજૌ
ત્વાં રુક્મિણીમુદવહદ્વિજિતારિલોકઃ ॥ ૪૩॥

આરભ્ય શૈશવમનારતમપ્રયત્નાત્
યત્પૂતનાદિવિપદુત્તરણં મુરારેઃ ।
કલ્યાણિ રુક્મિણિ જગજ્જનનિ ત્વદીય-
મઙ્ગલ્યસૂત્રમહિમા ખલુ તત્ર હેતુઃ ॥ ૪૪॥

જામાતા પુરુષોત્તમસ્સુસદૃશો લક્ષ્મ્યાસ્સુતાયા મમે-
ત્યાનન્દૈરુદિતૈરિવાન્તરમિતૈસ્તુઙ્ગૈસ્તરઙ્ગૈર્વૃતમ્ ।
દુગ્ધાબ્ધિં પિતરં તવામ્બ દયિતઃ પશ્યન્પ્રભૂતાકૃતિઃ
પ્રત્યગ્રામ્બુજલોચનઃ ફણિપતૌ શેતે નભશ્શ્યામલઃ ॥ ૪૫॥

ભવ્યં પદ્માદિરૂપં પરિમલમપિ ચાદાય સૃષ્ટેવ મૃદ્વી
પદ્મે ત્વન્નિત્યભોગ્યપ્રિયતમવપુરુત્કર્ષજાતાતિશઙ્કા ।
વિશ્લેષ્ટું ન ક્ષમાઽહં ક્ષણમપિ દયિતત્વાદિતિ વ્યાહરન્તી
શ્લિષ્યન્તી કાન્તવક્ષસ્સુદૃઢમવિરતં મોદસે વેઙ્કટાદ્રૌ ॥ ૪૬॥

શ્રીમદ્વેઙ્કટશૈલનીલજલદવ્રાતાભિજાતાકૃતેઃ
શાર્ઙ્ગશ્રીજિતચારુશક્ર ધનુષશ્શશ્વત્કૃપાવર્ષિણઃ ।
મન્દ્રં મન્દસમીરપૂરણકૃતં શઙ્ખધ્વનિં બિભ્રતઃ
વિષ્ણોઃ શ્રીરુરસિ સ્થિતા વિતનુષે વિદ્યુલ્લતાવિભ્રમમ્ ॥ ૪૭॥

યથાઽનર્ઘં રત્નં ભવતિ નિજદીપ્ત્યા પરિવૃતં
યથા પુષ્પપુષ્પં નવપરિમલર્દ્ધ્યા બહુમતમ્ ।
તથા વિત્યાશ્લિષ્ટો ભગવતિ ભવત્યા મહિતયા
નિષેવ્યસ્સર્વેષાં ભવતિ ભગવાંસ્ત્વત્સહચરઃ ॥ ૪૮॥

ઇયં ગાથા કાઽપિ શ્રવણપથવૃત્તા તનુભૃતાં
ભવેત્કિઞ્ચિદ્વસ્તુ સ્વપરગુણનિર્વાહકમિતિ ।
મૃષા નૈષા સૂક્તિર્ભગવતિ યતઃ શ્રીર્નિરુપમા
ત્વમેવ શ્રીમત્તાં તવ ચ તવ પત્યુઃ પ્રથયસે ॥ ૪૯॥

સ્વશેષૈરુત્કર્ષે સતિ ન ખલુ શેષિત્વવિહતિઃ
યતશ્શેષી શેષૈરેતિશયકરૈરેવ ભવતિ ।
અતઃ શ્રીઃ કાન્તસ્તે ત્વદુપહિતનિસ્સીમમહિમા-
ઽપ્યહીનસ્વાતન્ત્ર્યો ભવતિ ન પરોપાધિકગુણઃ ॥ ૫૦॥

મન્દસ્પર્શં મલયમરુતાં માધુરીં માક્ષિકાણાં
વીણાનાદં ક્ષણરુચિરુચિં સૌરભં વારિજાનામ્ ।
આદાયાઙ્ગં તવ કૃતમિતિ શ્રીર્વચો યૌક્તિકાનાં
કાલાતીતં નિગમવચસા તસ્ય નિત્યત્વસિદ્ધેઃ ॥ ૫૧॥

આમોદમેદુરમરાલમુદારબન્ધં
મૃદ્વાયતં ચમરવાલવિલાસજૈત્રમ્ ।

આનીલમદ્ભુતમનાતપવાર્યમમ્બ
કેશાપદેશતિમિરં બિભૃષે કિમેતત્ ॥ ૫૨॥

કિંનુ સ્વિદમ્બ તિમિરસ્ય વિપત્તિ(ક્તિ)રેષઃ
કિંવા નવોત્પલજનીલિમસમ્પ્રદાયઃ ।
ભિન્નાઞ્જનોપલરુચામથવૈષ રાશિઃ
ઇત્યાદિસંશયપદં તવ કેશપાશઃ ॥ ૫૩॥

કર્ણાવતંસકલિકાયિતલોચનેન
સ્વર્ણાત્મદર્શસુહૃદા સુષમોત્તરેણ ।
મન્દસ્મિતાંશુ મધુરેણ તવાનનેન
ચન્દ્રઃ કલઙ્કકલુષઃ કથમમ્બ તુલ્યઃ ॥ ૫૪॥

અભિનવમરવિન્દં કિન્નુ ભૃઙ્ગાનુલીનં
સજલદશકલં વા શારદં ચન્દ્રબિમ્બમ્ ।
કનકમુકુરમાહો નીલરત્નાનુવિદ્ધં
જનનિ મુખમિદં તે સ્નિગ્ધનીલાલકં વા ॥ ૫૫॥

માતસ્તવૈતદભિજાતસુવર્ણપટ્ટ-
સૌભાગ્યહારિ નિટિલં નિરપેક્ષભૂષમ્ ।
કસ્તૂરિકોર્ધ્વતિલકં બિભૃષે તથાઽપિ
નૂનં તદસ્ય તિલકસ્ય પરિષ્ક્રિયાયૈ ॥ ૫૬॥

અસિતમવનતં ચ સ્નિગ્ધમાયુષ્ય[મેતત્
તવ જનનિ સમિન્ધે ભ્રૂયુગં દેવિ દિવ્યમ્ ।
વિલસિતવિવશસ્સન્ યસ્ય નિસ્સીમકાન્તેઃ
વિહિતવિવિધવિશ્વો વિષ્ણુરાજ્ઞાકરસ્તે ॥ ૫૭॥

જિઘ્રાસયેવ મુખમારુતસૌરભાણાં
દ્રાઘીયસી જનનિ તાવકનાસિકેયમ્ ।
ભ્રૂસેતુમધ્યવિવરેણ લલાટદિવ્ય-
સૌન્દર્યસારસરિતઃ પ્રસૃતેવ કુલ્યા ॥ ૫૮॥

અધિગતવતોરક્ષ્ણોઃ કૃષ્ણાત્વમર્જુનતાં ચ તે
જનિતરણયોર્ ભ્રૂકોદણ્ડસ્પૃશોરનુરક્તયોઃ ।
કથમિવ પરા મૈત્રી કર્ણેન કુણ્ડલચારુણા
સમજનિ જનન્યાશ્ચર્યાણામસિ ત્વમપાશ્રયઃ ॥ ૫૯॥

દ્વિજૈરેતૈઃ પઙ્ક્તાવવિવરનિવિષ્ટૈરવિષમૈઃ
ઉદગ્રૈરુદ્ભાભિશ્શુચિભિરધરસ્યાસ્ય કમલે ।
સ્મયાયત્તવ્યક્તેરપિ ચ પરભાગપ્રણયિનઃ
બહિષ્કારસ્સોઽયં સમુચિતતરઃ પલ્લવરુચેઃ ॥ ૬૦॥

સ્ફટિકમુકુરબિમ્બૌ નીલરત્નાંશુગર્ભૌ
કિમમૃતકિરણૌ દ્વૌ શારદૌ શ્રીકરાઙ્કૌ ।
અથ વિમલકપોલૌ દેવિ તે દર્શનીયૌ
શ્રવણકુવલયશ્રીજાતવર્ણપ્રકર્ષૌ ॥ ૬૧॥

માતઃ સ્વભાવસુષમાપુનરુક્તભૂષઃ
પત્યુસ્તવાપિ વિજયાવહભવ્યરેખઃ ।
સ્વામોદસમ્પદધિવાસિત સર્વગન્ધઃ
કણ્ઠો મૃદુઃ કથય કમ્બુસમઃ કથં સ્યાત્ ॥ ૬૨॥

સૌભાગ્યસમ્પદભિભૂતસુવર્ણકુમ્ભૌ
ભૂયઃ પરાસ્તપરિણાહિપયોજકોશૌ ।
કૂલઙ્કુષૌ કુચભરૌ ગુરુભારહારૌ
પુત્રસ્ય દેવિ કુશલં કુરુતો દૃશોર્મે ॥ ૬૩॥

તારુણ્યસૌરભતરઙ્ગિતહૃત્તટાકે
જાતૌ સ્તનદ્વયમિષેણ સરોજકોશૌ ।
તન્મૂલલગ્નસિતબાલમૃણાલિકૈવ
મુક્તાવલીતિ મમ માતરભૂદ્વિતર્કઃ ॥ ૬૪॥

બાહાશ્શિરીષમૃદવસ્તનવસ્સુવૃત્તાઃ
શમ્પારુચસ્સમુચિતાભરણાશ્ચતસ્રઃ ।
માતસ્સપલ્લવસકોરકકલ્પવલ્લી -
બાલપ્રતાનવિતતીરનુકુર્વતે તે ॥ ૬૫॥

તન્વી તલોદરગતા તવ રોમરાજિઃ
આભાતિ દેવિ કુચતુઙ્ગકુલાચલાભ્યામ્ ।
નિષ્ક્રમ્ય નાભિસરસીમભિયાન્ પિપાસુઃ
આનીલભોગ ઇવ કશ્ચન બાલસર્પઃ ॥ ૬૬॥

પીતામ્બરસ્થગિતમધ્યકટીનિતમ્બ-

કમ્રોરુકાણ્ડવરજાનુયુગોપમાનમ્ ।
નાસ્ત્યસ્તિ ચેદ્ભદતુ દેવિ તવૈવ કાન્તઃ
સર્વજ્ઞ ઇત્યનુવિનાદિતકાહલીકઃ ॥ ૬૭॥

વૃત્તે તવામ્બ લભિ(લિ)તે વિધૃતાનુપૂર્વ્યે
પીતામ્બરાઞ્ચલપિશઙ્ગરુચાઽભિષિક્તે ।
સૌવર્ણકાહલસમે સમસન્નિવેશે
જઙ્ઘે તુ(ન) લઙ્ઘયતિ સેવકલોકદૃષ્ટિઃ ॥ ૬૮॥

પ્રત્યગ્રકલ્પતરુપલ્લવપાટલાભૌ
વજ્રધ્વજાબ્જમુખમઙ્ગલચિહ્નગર્ભૌ ।
ઇન્દ્રાદિદેવમણિમૌલિમહાર્હપીઠૌ
માતસ્ત્વદીયચરણૌ શરણં પ્રપદ્યે ॥ ૬૯॥

ચન્દ્રસ્ત્વદીયમુખકાન્તિજિતઃ કલઙ્કી
શ્રીરમ્બ વૃત્તવિશદાંશુનખાપદેશાત્ ।
ચારુ પ્રપદ્ય ચરણદ્વિતયં ભવત્યાઃ
પૂર્ણોઽકલઙ્કદશમૂર્તિરજસ્રમાસીત્ ॥ ૭૦॥

વિદ્યુદ્દામદ્યુતિભિરુચિતૈર્દિવ્યભૂષાસહસ્રૈઃ
સ્થાને દેવિ સ્થગયસિ વપુર્દિવ્યમાપાદચૂડમ્ ।
નોચેત્ સર્વાવયવસુષમાસ્વસ્વદેશાનુકર્ષ-
શ્રાન્તસ્વાન્તસ્તિમિતનયનો વલ્લભસ્તે જલ[ઽ]સ્સ્યાત્ ॥ ૭૧॥

સ [ન] સત્કર્મ જ્ઞાનં ન ચ વિમલમધ્યાત્મવિષયં
ત્વયિ ત્વત્કાન્તે વા ન હિ પરમભક્તિસ્ત્વજનિ મે ।
તતશ્ચાકિઞ્ચિત્કો દુરિતભરિતોઽનન્યગતિકઃ
શરણ્યે દેવિ ત્વાં શરણમભિપદ્યે ભગવતીમ્ ॥ ૭૨॥

અનન્તાસહ્યાગસ્કૃત [મકૃત] સદ્વૃત્તિમશુચિં
પ્રહીણં શબ્દાદિપ્રવણમતિલજ્જાભયદયમ્ ।
પ્રસક્તં સ્ત્રીમાત્રે પશુવદશુભૈકાસ્પદમિમં
કથં માતઃ ક્ષામ્યેદખિલખલશાસી તવ પતિઃ ॥ ૭૩॥

કદાચિત્કાન્તસ્તે હિતપરપિતૃત્વેન કલુષઃ
કૃતાગસ્સ્વસ્માસુ સ્વયમુચિતશિક્ષાં તિતનિષેત્ ।
તદા માતસ્ત્વં ચ ભ્રુકુટિપરતન્ત્રં પ્રણયિનં

પ્રલોભ્ય સ્વૈરઙ્ગૈશ્ચરણપરિચર્યાં ઘટય નઃ ॥ ૭૪॥

અસ્પૃષ્ટસંસરણદુઃખલવૈરનાદિ-
સિદ્ધૈરસઙ્કુચિતનિત્યસુખાવબોધૈઃ ।
ભવ્યૈઃ પરસ્પરપરિસ્થિતશેષભાવૈઃ
સંવાસયામ્બ સહજૈસ્તવ કિઙ્કરૈર્મામ્ ॥ ૭૫॥

આમ્રા[આમ્લા] નૈરમૃતદ્રવપ્રિયસખૈરૌદાર્યકર્ણેજપૈઃ
અત્યૈશ્વર્યમદાલસૈરભિમુખેષ્વાભાષિતસ્વાગતૈઃ ।
અમ્બાવિષ્કૃતકૂલમુદ્વહકૃપાવાત્સલ્યવિસ્રમ્ભણૈઃ
આલોકૈરભિષિઞ્ચ મામનુકલં ત્વત્પાદપદ્માશ્રયમ્ ॥ ૭૬॥

ત્વદ્દાસદાસકુલરાજકુલાશ્રયેણ
ભવ્યોત્તમસ્ય મમ કર્મજવાગ્વિમર્દાન્ ।
સ્તોત્રાપદેશવિહિતાનપિ તાનસઙ્ખ્યાન્
માતઃ ક્ષમસ્વ મયિ કેવલવત્સલા ત્વમ્ ॥ ૭૭॥

અસ્મદ્ગુરું પરમકારુણિકં ત્વદઙ્ઘ્રિ-
નિસ્સીમભક્તિનિધિમાર્યમનર્ઘશીલમ્ ।
સૌમ્યોપયન્તૃમુનિમાત્મવિદં સમીક્ષ્ય
માતઃ પ્રસીદ મમ વૃત્તમચિન્તયિત્વા ॥ ૭૮॥

દેવ્યા મદીયરસનાધ્[સ]નયા શ્રિયેવ
સ્વપ્રીતયે સ્તુતિમિમામુદિતાં ગૃણન્તઃ ।
ભુક્ત્વા  સમૃદ્ધિમિહ સદ્ભિરનન્યભોગૈઃ
અન્તે ચ સૂરિપરિષત્પ્રથમાર્હણીયાઃ ॥ ૭૯॥

॥ શ્રીવાદિભયઙ્કરગુરવે નમઃ ॥ શ્રીવેઙ્કટગુરવે નમઃ ॥

॥ ઇતિ શ્રીલક્ષ્મીસ્તોત્રમ્ ॥

From venkaTeshakAvyakalApaH

Proofread by Malleswara Rao Yellapragada malleswararaoy at yahoo.com

*lakShmIstotram from Venkateshakavyakalapa*

pdf was typeset on October 30, 2022

Please send corrections to *sanskrit@cheerful.com*